# शिष्योत्तमः।

**अवबोधनम्।**

**अ. संस्कृतभाषया एकवाक्येन उत्तरं लिखत।**

*१. प्राचीनरसायनशास्त्रज्ञस्य नाम **किम्** आसीत्?

उत्तरः प्राचीनरसायनशास्त्रज्ञस्य नाम **नागार्जुनः इति** आसीत्।

*२. देशविदेशेषु **कस्य** कीर्तिः प्रसृता?

उत्तरः देशविदेशेषु **सेवाव्रतिनः नागार्जुनस्य** कीर्तिः प्रसृता।

*३. महाराजः द्वौ युवानौ **कुत्र** प्रेषितवान्?

उत्तरः महाराजः द्वौ युवानौ **नागार्जुनं प्रति** प्रेषितवान्।

*४. नागार्जुनः युवनोः परीक्षार्थं प्रथमं **किम्** अकरोत्?

उत्तरः नागार्जुनः युवनोः परीक्षार्थं प्रथमम् **उभावपि एकेकं वस्तु दत्त्वा अन्येद्युः तस्मात् किमपि रसायनं औषधं वा निर्माय आनयतम् इति अकथयत्।**

५. **कं** गत्वा नागार्जुनः प्रार्थयामास?

उत्तरः **राजानं** गत्वा नागार्जुनः प्रार्थयामास।

६. नागार्जुनस्य कृते **कस्मात्** सहायकस्य आवश्यकता आसीत्?

उत्तरः नागार्जुनस्य कृते **कार्यबाहुल्यात्** सहायकस्य आवश्यकता आसीत्।

**ब. योग्यं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

*१. इदं ________ ________ गच्छतम्।

(पीत्वा / गृहीत्वा) (स्वगृहं / स्वगृहस्य)

**उत्तरः** इदं **गृहीत्वा स्वगृहं** गच्छतम्।

*२. किं ________ नानीतं ________ ?

(तुभ्यम् / त्वया) (पेयम् / रसायनम्)

**उत्तरः** किं **त्वया** नानीतं **रसायनम्**?

३. ________ सेवाव्रतिनः कीर्तिः देशविदेशेषु ________ । (तस्य / त्वम्) (प्रसृतम् / प्रसृता)

**उत्तरः** **तस्य** सेवाव्रतिनः कीर्तिः देशविदेशेषु **प्रसृता**।

४. एकदा ________ गत्वा ________ प्रार्थयामास।

(राजानं/ राज्ञा) (युवकः / नागार्जुनः)

**उत्तरः** एकदा **राजानं** गत्वा **नागार्जुनः** प्रार्थयामास।

५. तं प्रति ________ द्वौ युवानौ ________ ।

(महाराजः / नागार्जुनः) (प्रेषितवन्तः/ प्रेषितवान्)

**उत्तरः** तं प्रति **महाराजः** द्वौ युवानौ **प्रेषितवान्** ।

६. अपरेद्युः ________ तौ ________ प्रति आगतवन्तौ।

(अपरौ / उभौ) (नागार्जुनं / नागार्जुनाय)

**उत्तरः** अपरेद्युः **उभौ** तौ **नागार्जुनं** प्रति आगतवन्तौ।

७. _________ भवानिति । (पश्य / पश्यतु/ पश्यन्तु)

**उत्तर: पश्यतु** भवानिति।

८. द्वितीयं _________ दृष्ट्वा _________ पृष्टम्।

(शान्तचेतस: / शान्तचेतसं) (नागार्जुनेन / महाराजेन)

**उत्तर:** द्वितीयं **शान्तचेतसं** दृष्ट्वा **नागार्जुनेन** पृष्टम्।

**क. क: कं वदति तद् लिखत।**

१. "कार्यबाहुल्याद् मत्कृते सहायकस्य आवश्यकता वर्तते।"

**उत्तर: नागार्जुन: महाराजं वदति।**

२. "इदं गृहीत्वा स्वगृहं गच्छतम्।"

**उत्तर: नागार्जुन: द्वौ युवानौ वदति।**

३. "श्व: तस्मात् किमपि रसायनं औषधं वा निर्मीय आनयतम्।"

**उत्तर: नागार्जुन: द्वौ युवानौ वदति।**

४. "महाशय, अहं रसायनं कृत्वा आनीतवान्।"

**उत्तर: एक: युवक: नागार्जुनं वदति।**

५. "कथमिदानीम् अभाषमाण: तिष्ठसि?"

**उत्तर: नागार्जुन: द्वितीयं युवकं वदति।**

६. "किं त्वया नानीतं रसायनम्?"

**उत्तर: नागार्जुन: द्वितीयं युवकं वदति।**

ड. **सत्यं वा असत्यं तद् लिखत।**

१. आसीत् पुरा सुविख्यातो नागार्जुनो नाम गणितज्ञ:।

**उत्तर: असत्यम्।**

२. सेवाव्रतिन: नागार्जुनस्य कीर्ति: देशविदेशेषु प्रसृता ।

**उत्तर: सत्यम्।**

३. कार्यबाहुल्याद् नागार्जुनस्य कृते विश्रामस्य आवश्यकता आसीत्।

**उत्तर: असत्यम्।**

४. द्वितीये दिने एव नागार्जुनं प्रति महाराज: द्वौ युवानौ प्रेषितवान्।

**उत्तर: सत्यम्।**

५. द्वितीय: युवा अभाषमाण: अतिष्ठत्।

**उत्तर: सत्यम्।**

६. नागार्जुन: सेवाव्रतिन: चिकित्सक: आसीत् ।

**उत्तर: सत्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. नागार्जुन: द्वौ युवानौ किमर्थं परीक्षितुम् ऐच्छत् इति भवतां मतम्? माध्यमभाषया स्पष्टीकुरुत।

उत्तर: 'शिष्योत्तम:।' या पाठात वैद्याकडे वैद्यकशास्त्राच्या ज्ञानासोबतच कोणती महत्त्वाची गुणवैशिष्ट्ये असणे आवश्यक असते, याचे वर्णन आले आहे. रुग्णावर सहानुभूतीने उपचार करणे हे वैद्याने आपले आद्यकर्तव्य समजले पाहिजे.

नागार्जुन हे प्राचीन काळातील विख्यात रसायनतज्ज्ञ आणि वैद्य होते. रसायनशास्त्र या शाखेतील ते एक अग्रगण्य भारतीय शास्त्रज्ञ होते.

अत्यंत समर्पित वृत्तीचे विद्वान असल्यामुळे त्यांच्या यशाच्या गाथा व प्रसिद्धी देशोदेशी पसरली होती. रुग्णांची करुणेने सेवा करणे, हे ते आपले कर्तव्य मानत असत. सेवाभाव हा वैद्याचा सर्वांत महत्त्वपूर्ण गुण आहे, असे त्यांना वाटत असे. ते अतिशय प्रसिद्ध असल्यामुळे अनेक रुग्ण त्यांच्याकडे उपचारांसाठी येत असत. कामाचा अतिरिक्त भार वाढल्यामुळे त्यांना सहायकाची गरज असू लागली. त्यांनी राजाकडे एक सहायक देण्याची विनंती केली. त्यांच्या विनंतीनुसार राजाने दोन युवकांना त्यांच्याकडे पाठवले. पण जरी राजाने त्या दोघांना पाठवले असले, तरीही नागार्जुनांनी आंधळेपणाने त्यांची नेमणूक न करता त्यांची परीक्षा घेण्याचे ठरवले. नागार्जुनांचे असे मत होते, की सेवाभाव, करुणा, माणुसकी ही एका वैद्याची सर्वांत महत्त्वाची गुणवैशिष्ट्ये आहेत आणि वैद्यकीय ज्ञानाबरोबरच व्यक्तीमध्ये हे गुण असलेच पाहिजेत.

म्हणूनच, या दोन युवकांचे वैद्यकीय ज्ञान व गुण तपासून पाहण्यासाठी नार्गाजुनांना त्यांची परीक्षा घ्यायची होती, जेणेकरून त्यांनी नेमलेला सहायक त्यांच्या रुग्णांच्या सेवेसाठी स्वत:ला वाहून घेणारा असेल.

## पृथक्करणम्।

**१. अधोदत्तानि वाक्यानि क्रमानुसारं संयोजयत।**

i अपरेद्यु: उभौ तौ नागार्जुनं प्रति आगतवन्तौ।

ii. महाराज: द्वौ युवानौ नागार्जुनं प्रति प्रेषितवान्।

iii. नागार्जुन: एकेकं वस्तु दत्तवान्।

iv. राजानं गत्वा नागार्जुन: प्रार्थयामास।

**उत्तर: i. राजानं गत्वा नागार्जुनः प्रार्थयामास।**

**ii. महाराजः द्वौ युवानौ नागार्जुनं प्रति प्रेषितवान्।**

**iii. नागार्जुनः एकेकं वस्तु दत्तवान्।**

**iv. अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ।**

## शब्दज्ञानम्।

अ. गद्यांशे पर्यायशब्दं चित्वा लिखत।

| | | | |
|---|---|---|---|
| *१. | ख्यातिः, प्रसिद्धिः, विख्यातिः, विश्रुतिः | = | कीर्तिः। |
| *२. | निशम्य, श्रुत्वा | = | आकर्ण्य। |
| *३. | अपरेद्युः, अन्येद्युः (उद्या) | = | श्वः। |
| *४. | वीक्ष्य, विलोक्य, अवलोक्य (पाहून) | = | दृष्ट्वा। |
| ५. | प्रसिद्धः, प्रख्यातः, प्रथितः, विश्रुतः | = | सुविख्यातः। |
| ६. | वैद्यः, भिषग्, रोगज्ञः | = | चिकित्सकः। |
| ७. | युवकौ | = | युवानौ। |
| ८. | नृपः, भूपः,नृपतिः भूपालः, पार्थिवः | = | राजा। |
| ९. | सहकारी, सहायः | = | सहायकः। |
| १०. | भेषजम्, भैषज्यम्, रोगहरम् | = | औषधम्। |

ब. गद्यांशे विलोमशब्दं चित्वा लिखत।

| | | | |
|---|---|---|---|
| १. | कुविख्यातः, कुख्यातः | × | सुविख्यातः। |
| २. | अपकीर्तिः | × | कीर्तिः। |
| ३. | आगम्य, आगत्य | × | गत्वा। |
| ४. | अनावश्यकता | × | आवश्यकता। |
| ५. | दत्त्वा | × | गृहीत्वा। |
| ६. | ह्यः (काल) | × | श्वः। |
| ७. | गतवन्तौ | × | आगतवन्तौ। |
| ८. | नीतवान् | × | आनीतवान्। |
| ९. | भाषमाणः | × | अभाषमाणः। |

क. चतुर्थपदं लिखत।

१. दा : दत्त्वा :: कृ : ______

उत्तर: दा : दत्त्वा :: कृ : **कृत्वा**

२. ग्रह् : गृहीत्वा : : दृश् : ______

उत्तर: ग्रह् : गृहीत्वा : : दृश् : **दृष्ट्वा**

३. प्र + इष् : प्रेषितवान् :: आ + नी : ______

उत्तर: प्र + इष् : प्रेषितवान् :: आ + नी : **आनीतवान्**

४. कृ : कृत्वा :: श्रु : ______

उत्तर: कृ : कृत्वा :: श्रु : **श्रुत्वा**

५. गम् – गच्छ् : गच्छतम् :: आ + नी – नय् : ______

उत्तर: गम् – गच्छ् : गच्छतम् :: आ + नी – नय् : **आनयतम्**

६. आनयतम् + इति : आनयतमिति :: भवान् + इति :

______

उत्तर: आनयतम् + इति : आनयतमिति :: भवान् + इति :
**भवानिति**

## ड. विशेषण-विशेष्य-अन्वितिः।

१. गद्यांशे विशेषणानि चित्वा जालरेखाचित्रे लिखत।

शान्तचेत:, सुविख्यात:, अभाषमाण:, सेवाव्रती




उत्तर: १. सुविख्यात:। ३. शान्तचेत:।

२. सेवाव्रती। ४. अभाषमाण:।

2. स्तम्भमेलनं कुरुत।

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | सुविख्यात: | अ. | दिने |
| ii. | द्वितीये | ब. | द्वितीयम् |
| iii. | द्वौ | क. | रसायनशास्त्रज्ञ: |
| iv. | शान्तचेतसम् | ड. | युवानौ |

उत्तर: **i.** **सुविख्यात: रसायनशास्त्रज्ञ:।**

**ii.** **द्वितीये दिने।**

**iii.** **द्वौ युवानौ।**

**iv.** **शान्तचेतसं द्वितीयम्।**

इ. **धातुसाधित-अव्ययानां चयनम् (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।**

१. गद्यांशे आगतानि 'त्वान्त' अव्ययानि चित्वा जालरेखाचित्रे लिखत।




**उत्तर: 1. गत्वा। 3. गृहीत्वा।**

**2. दत्त्वा। 4. दृष्ट्वा।**

२. गद्यांशे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययं चित्वा लिखत।

**उत्तर: ल्यबन्त-अव्ययम्-**

**i. निर्माय।**

३. गद्यांशे हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

**उत्तर: तुमन्त-अव्ययम्-**

**i. परीक्षितुम्।**

४. गद्यांशे सप्तमी-विभक्त्यन्तपदानि चित्वा लिखत।

**उत्तर: i. देशविदेशेषु। ii. द्वितीये।**
**iii. दिने। iv. तयो:।**

**फ. समूहेतरपदं चिनुत।**

१. सुविख्यातः, अभाषमाणः, रसायनशास्त्रज्ञः, चिकित्सकः

**उत्तर: अभाषमाणः।**

२. गत्वा, दत्त्वा, निर्मीय, दृष्ट्वा

**उत्तर: निर्मीय।**

३. प्रसृता, पृष्टम्, आनीतम्, अवदत्

**उत्तर: अवदत्।**

४. पश्यतु, प्रेषितवान्, आगतवन्तौ, आनीतवान्

**उत्तर: पश्यतु।**

५. सुविख्यातः, सिद्धः, प्रख्यातः, प्रसिद्धः

**उत्तर: सिद्धः।**

६. दृष्ट्वा, विलोक्य, परीक्षितुम्, वीक्ष्य

**उत्तर: परीक्षितुम्।**

## अवबोधनम्।

**अ. संस्कृतभाषया एकवाक्येन उत्तरं लिखत।**

*१. नागार्जुनः द्वितीयं युवानं सहायकत्वेन **किमर्थं** स्वीकृतवान्?

**उत्तरः** **द्वितीयस्य युवकस्य सेवाभावं ज्ञात्वा** नागार्जुनः द्वितीयं युवानं सहायकत्वेन स्वीकृतवान्।

*२. सेवाभावः **कीदृशः** वर्तते?

**उत्तरः** सेवाभावः **परमगहनः** वर्तते ।

३. गृहं गच्छन्तौ युवानौ पथि **किम्** अपश्यताम्?

**उत्तरः** गृहं गच्छन्तौ युवानौ पथि **एकं रुग्णम्** अपश्यताम्।

४. **केन** विना कोऽपि चिकित्सकः न भवेत्?

**उत्तरः** **सेवाभावेन** विना कोऽपि चिकित्सकः न भवेत्।

५. **कः** परीक्षणीयः?

**उत्तरः** **सेवाभावः** परीक्षणीयः।

६. द्वितीयः युवकः रुग्णं **कुत्र** नीतवान्?

**उत्तरः** द्वितीयः युवकः रुग्णं **रुग्णालयं** नीतवान्।

७. द्वितीयः युवकः **कस्मात्** रसायनं निर्मातुं न अशक्नोत्?

**उत्तरः** द्वितीयः युवकः **समयाभावात्** रसायनं निर्मातुं न अशक्नोत्।

८. द्वितीयेन युवकेन **कस्य** सेवा कृता?

**उत्तरः** द्वितीयेन युवकेन **रोगिणः** सेवा कृता।

**ब. योग्यं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

*१. ________ किमर्थं सहायकपदं __________ ?

(तस्मै / तेन) (दत्ता / दत्तम्)

**उत्तर:** **तस्मै** किमर्थं सहायकपदं **दत्तम्**?

*२. ________ विना कथं __________ भवेत्?

(सेवाभावाय / सेवाभावेन) (चिकित्सक: / लेखक:)

**उत्तर:** **सेवाभावेन** विना कथं **चिकित्सक:** भवेत्?।

३. ________ एकं रुग्णम् __________ ।

(वयम् / आवाम्) (अनयाव / अपश्याव)

**उत्तर:** **आवाम्** एकं रुग्णम् **अपश्याव**।

४. ________ समीपे __________ सेवां कृतवान्।

(तस्य / तेन) (खेलित्वा / स्थित्वा)

**उत्तर:** **तस्य** समीपे **स्थित्वा** सेवां कृतवान्।

५. अस्यैव नियुक्ति: __________ ________ ।

(तस्मिन् / मया) (कृता / कृतम्)

**उत्तर:** अस्यैव नियुक्ति: **मया कृता**।

**क. कः कं वदति तद् लिखत।**

१. "आवामेकं रुग्णमपश्याव।"

**उत्तरः द्वितीयः युवकः नागार्जुनं वदति।**

२. "तस्य समीपे स्थित्वा सेवां कृतवान्।"

**उत्तरः द्वितीयः युवकः नागार्जुनं वदति।**

३. "समयाभावाद् रसायनं निर्मातुं नाशक्नवम्।"

**उत्तरः द्वितीयः युवकः नागार्जुनं वदति।**

४. "रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम्?"

**उत्तरः राजा नागार्जुनं वदति।**

५. "एतेन रोगिणः सेवा कृता।"

**उत्तरः नागार्जुनः राजानं वदति।**

६. "सेवाभावेन विना कथं चिकित्सकः भवेत्?"

**उत्तरः नागार्जुनः राजानं वदति।**

७. "अस्यैव नियुक्तिः मया कृता।"

**उत्तरः नागार्जुनः राजानं वदति।**

**ङ. सत्यं वा असत्यं तद् लिखत।**

१. गच्छन् पथि नागार्जुन: एकं रुग्णम् अपश्यत्।

**उत्तर: असत्यम्।**

२. द्वितीय: युवक: रुग्णस्य समीपे स्थित्वा सेवां कृतवान्।

**उत्तर: सत्यम्।**

३. कार्यबाहुल्याद् द्वितीय: युवक: रसायनं निर्मातुं नाशक्नोत्।

**उत्तर: असत्यम्।**

४. नागार्जुन: प्रथमं युवकं सहायकत्त्वेन स्वीकृतवान्।

**उत्तर: असत्यम्।**

५. सेवाभाव: परमसरल: अत: स एव परीक्षणीय:।

**उत्तर: असत्यम्।**

६. सेवाभावेन विना कोऽपि चिकित्सक: न भवेत्।

**उत्तर: सत्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. नागार्जुन: द्वितीयं युवकं सहायकत्वेन किमर्थं स्वीकृतवान्? एतस्य विषये भवत: मतं माध्यमभाषया लिखत।

उत्तर: 'शिष्योत्तम:।' या पाठात, एका वैद्याकडे वैद्यकशास्त्राच्या ज्ञानाव्यतिरिक्त कोणते गुण असणे महत्त्वाचे असते, याचे वर्णन आले आहे. रुग्णावर करुणेने उपचार करणे हे त्याने त्याचे आद्यकर्तव्य मानले पाहिजे.

प्राचीन काळातील सुप्रसिद्ध रसायनशास्त्रज्ञ नागार्जुन यांना कार्यबाहुल्यामुळे सहायक नेमण्याची गरज भासू लागली. त्यांच्या विनंतीनुसार राजाने दोन युवकांना त्यांच्याकडे पाठवले. नार्गाजुनांनी त्यांची परीक्षा घेण्याचे ठरवले आणि त्या दोघांनाही एक वस्तू देऊन त्यापासून रसायन बनवण्यास सांगितले. घरी परतत असताना त्या दोघा युवकांना औषधोपचारांची नितांत गरज असलेला एक रुग्ण दिसला. पण पहिला युवक रसायन तयार करण्यासाठी घरी निघून गेला. दुसऱ्या युवकाने मात्र त्या आजारी माणसाला रुग्णालयात नेले आणि त्याची सेवा केली. दुसऱ्या दिवशी, त्या दोन युवकांमधून सहायकाची निवड करताना नार्गाजुनांनी रसायन तयार करून आणू न शकलेल्या युवकाची निवड केली. पहिल्या युवकाने रसायन तयार करून आणले होते, पण त्याने स्वत:च्या फायद्यासाठी रस्त्यातील त्या आजारी व्यक्तीकडे दुर्लक्ष केले होते. दुसऱ्या युवकाने मात्र रुग्णाची सेवा करण्यासाठी स्वत:च्या फायद्याकडे दुर्लक्ष केले होते. दोघांकडेही वैद्यकीय ज्ञान होते, पण दुसऱ्या युवकाकडे सेवावृत्ती, करुणा आणि माणुसकी हे एका वैद्याकडे आवश्यक असणारे गुणही होते. यशस्वी वैद्य होण्यासाठी व्यक्तीमध्ये वैद्यकीय ज्ञानाबरोबरच हे गुण असणेही आवश्यक असते.

नागार्जुन स्वत: रुग्णसेवेचे व्रत घेतलेले समर्पित वृत्तीचे वैद्य असल्यामुळे त्यांनी दुसऱ्या युवकाच्या अंगी असलेले हे गुण ओळखले. म्हणूनच त्या दुसऱ्या युवकाने रसायन आणलेले नसूनही त्यांनी त्याची आपला सहायक म्हणून निवड केली आणि त्याच्या गुणांचे कौतुक केले.

## पृथक्करणम्।

१. घटनाक्रमानुसारं संयुज्य वाक्यानि पुनर्लिखत।

i. नागार्जुनेन द्वितीयस्य युवकस्य नियुक्तिः कृता।

ii. द्वितीयः युवकः तं रुग्णालयं नीतवान्।

iii. द्वौ युवानौ पथि एकं रुग्णम् अपश्यताम्।

iv. द्वितीयेन युवकेन रोगिणः सेवा कृता।

उत्तरः **i. द्वौ युवानौ पथि एकं रुग्णम् अपश्यताम्।**

**ii. द्वितीयः युवकः तं रुग्णालयं नीतवान्।**

**iii. द्वितीयेन युवकेन रोगिणः सेवा कृता।**

**iv. नागार्जुनेन द्वितीयस्य युवकस्य नियुक्तिः कृता।**

२. गद्यांशे आगतानि एतानि धातुसाधित–विशेषणानि पृथक् कुरुत।

दत्तम्, नीतवान्, कृतवान्, कृता, आनीतम्, स्वीकृतवान्, पृष्टे, दर्शिता




उत्तर: १. **दत्तम्।** २. **कृता।**

३. **आनीतम्।** ४. **पृष्टे।**

५. **दर्शिता।** ६. **नीतवान्**

७. **कृतवान्।** ८. **स्वीकृतवान्।**

## शब्दज्ञानम्।

**अ. गद्यांशे पर्यायवाचिशब्दं चिनुत।**

| | | |
|---|---|---|
| *१. | निशम्य, श्रुत्वा | = **आकर्ण्य।** |
| *२. | दृष्ट्वा, विलोक्य, अवलोक्य | = **वीक्ष्य।** |
| ३. | अवदत्, अगदत्, अभाषत | = **अभणत्।** |
| ४. | रोगी, अस्वस्थ:, व्याधिग्रस्त: (जवळ) | = **रुग्णम्।** |
| ५. | समीपम्, पार्श्वे, निकटे, निकषा | = **समीपे।** |
| ६. | परिचर्या, उपचर्या, उपचार: | = **सेवा।** |
| ७. | प्रयुक्ति:, नियोग: | = **नियुक्ति:।** |
| ८. | कठिन:, अगम: | = **गहन:।** |

**ब.** **गद्यांशे विलोमपदं चित्वा लिखत।**

| | | | |
|---|---|---|---|
| *१. | मन्दं मन्दम्, शनैः | × | **झटिति।** |
| *२. | अगहनः, सरलः, सुलभः | × | **गहनः।** |
| *३. | अर्थहीनम् | × | **यथार्थम्।** |
| *४. | आनीतवान् | × | **नीतवान्।** |
| ५. | उच्चस्वरेण | × | **मन्दस्वरेण।** |
| ६. | दूरे | × | **समीपे।** |
| ७. | त्यक्तवान् | × | **स्वीकृतवान्।** |
| ८. | अमानुषता, नृशंसता | × | **मानवता।** |

**क.** **चतुर्थपदं लिखत।**

१. स्था : स्थित्वा :: ज्ञा : ______

**उत्तरः** स्था : स्थित्वा :: ज्ञा : **ज्ञात्वा**

२. वि + ईक्ष् : वीक्ष्य :: आ + कर्ण् : ______

**उत्तरः** वि + ईक्ष् : वीक्ष्य :: आ + कर्ण् : **आकर्ण्य**

३. नी : नीतवान् :: कृ : ______

**उत्तरः** नी : नीतवान् :: कृ : **कृतवान्**

४. गद् : अगदत् :: भण् : ______

**उत्तरः** गद् : अगदत् :: भण् : **अभणत्**

**ड. विशेषण-विशेष्य-अन्विति:।**

१. गद्यांशे योग्यं विशेषणं चित्वा लिखत।

i. ________ रुग्णम्।

**उत्तर: एकं** रुग्णम्।

ii. ________ युवकम्।

**उत्तर: द्वितीयं** युवकम्।

iii. ________ सेवाभाव:।

**उत्तर: परमगहन:** सेवाभाव:।

**इ. धातुसाधित-अव्ययानां चयनम् (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।**

१. गद्यांशे आगतानि त्वान्त अव्ययानि चित्वा जालरेखाचित्रे लिखत।




**उत्तर: १. मत्वा। २. स्थित्वा। ३. ज्ञात्वा।**

२. गद्यांशे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत।

**उत्तर: ल्यबन्त-अव्यये-**

**i. आकर्ण्य। ii. वीक्ष्य।**

३. गद्यांशे हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

उत्तर: **तुमन्त-अव्ययम्-**

**i. निर्मातुम्।**

४. I. गद्यांशे चतुर्थी-विभक्त्यन्तपदं चित्वा लिखत।

उत्तर: **i. तस्मै।**

II. गद्यांशे षष्ठी-विभक्त्यन्तपदानि चित्वा लिखत।

उत्तर: **i. तस्य। ii. रोगिणः।**

**iii. अस्य।**

**फ. समूहेतरपदं चिनुत।**

१. मत्वा, वीक्ष्य, ज्ञात्वा, कृत्वा

उत्तर: **वीक्ष्य।**

२. नीतवान्, कृतवान्, दत्तम्, स्वीकृतवान्

उत्तर: **दत्तम्।**

३. एतेन, तम्, तस्मै, तस्य

उत्तर: **एतेन।**

४. झटिति, अतः, किमर्थम्, कथ्यते

उत्तर: **कथ्यते।**

# कृतिपत्रिकाया: तृतीय: विभाग: - व्याकरणम्।

## सन्धय:।

| | | | |
|---|---|---|---|
| *१. | तयोरेक: | = | तयो: + एक:। |
| *२. | अस्यैव | = | अस्य + एव। |
| *३. | उभावपि | = | उभौ + अपि। |
| *४. | कथमिदानीम् | = | कथम् + इदानीम्। |
| ५. | चिकित्सकश्च | = | चिकित्सक: + च। |
| ६. | एतच्छ्रुत्वा | = | एतत् + श्रुत्वा। |
| ७. | आनयतमिति | = | आनयतम् + इति। |
| ८. | भवानिति | = | भवान् + इति। |
| ९. | नानीतम् | = | न + आनीतम्। |
| १०. | तदाकर्ण्य | = | तत् + आकर्ण्य। |
| ११. | आवामेकम् | = | आवाम् + एकम्। |
| १२. | रुग्णमपश्याव | = | रुग्णम् + अपश्याव। |
| १३. | तस्यावस्थाम् | = | तस्य + अवस्थाम्। |
| १४. | नेयमिति | = | नेयम् + इति। |
| १५. | नाशक्नवम् | = | न + अशक्नवम्। |
| १६. | नागार्जुनस्तमेव | = | नागार्जुन: + तम् + एव। |
| १७. | आनीतमपि | = | आनीतम् + अपि। |
| १८. | नागार्जुनोऽभणत् | = | नागार्जुन: + अभणत्। |
| १९. | परमगहनोऽत: | = | परमगहन: + अत:। |
| २०. | तद्यथार्थमेव | = | तत् + यथार्थम् + एव। |

## पदपरिचय:।

### धातव:।

#### वर्तमानकाल:।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | काल: / अर्थ: | पुरुष: | वचनम् |
|---|---|---|---|---|---|---|
| १. | वर्तते | वृत् – वर्त् | १ आ.प. | वर्तमानकाल: | तृतीय: | एकवचनम् |
| २. | तिष्ठसि | स्था – तिष्ठ् | १ प.प. | वर्तमानकाल: | द्वितीय: | एकवचनम् |

#### प्रथमभूतकाल:।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | काल: / अर्थ: | पुरुष: | वचनम् |
|---|---|---|---|---|---|---|
| ३. | आसीत् | अस् | २ प.प. | प्रथमभूतकाल: | तृतीय: | एकवचनम् |
| ४. | अवदत् | वद् | १ प.प. | प्रथमभूतकाल: | तृतीय: | एकवचनम् |
| ५. | अगदत् | गद् | १ प.प. | प्रथमभूतकाल: | तृतीय: | एकवचनम् |
| ६. | अपश्याव | दृश्-पश्य् | १ प.प. | प्रथमभूतकाल: | प्रथम: | द्विवचनम् |
| ७. | अशक्नवम् | शक् | ५ प.प. | प्रथमभूतकाल: | प्रथम: | एकवचनम् |
| ८. | अभणत् | भण् | १ प.प. | प्रथमभूतकाल: | तृतीय: | एकवचनम् |

#### आज्ञार्थ:।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | काल: / अर्थ: | पुरुष: | वचनम् |
|---|---|---|---|---|---|---|
| *९. | पश्यतु | दृश् – पश्य् | १ प.प. | आज्ञार्थ: | तृतीय: | एकवचनम् |
| १०. | गच्छतम् | गम् – गच्छ् | १ प.प. | आज्ञार्थ: | द्वितीय: | द्विवचनम् |
| ११. | आनयतम् | आ + नी →नय् | १ उ.प. येथे प.प. | आज्ञार्थ: | द्वितीय: | द्विवचनम् |

#### विध्यर्थ:।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | काल: / अर्थ: | पुरुष: | वचनम् |
|---|---|---|---|---|---|---|
| १२. | भवेत् | भू – भव् | १ प.प. | विध्यर्थ: | तृतीय: | एकवचनम् |

#### कर्मणि।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | काल: / अर्थ: | पुरुष: | वचनम् |
|---|---|---|---|---|---|---|
| १३. | कथ्यते | कथ् | १० उ.प. | कर्मणि-वर्तमानकाल: | तृतीय: | एकवचनम् |

## परोक्ष-भूतकालः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| १४. | प्रार्थयामास | प्र + अर्थ् | १० आ.प. | आमन्त-परोक्ष-भूतकालः | तृतीयः | एकवचनम् |

## पूर्वकालवाचक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | पूर्वकालवाचक-धातुसाधितम् |
|---|---|---|---|---|
| *१५. | निर्मीय | निर् + मा | २ प.प. | ल्यबन्त - अव्ययम्। |
| १६. | गत्वा | गम् – गच्छ् | १ प.प. | त्वान्त - अव्ययम्। |
| १७. | श्रुत्वा | श्रु | ५ प.प. | त्वान्त - अव्ययम्। |
| १८. | दत्त्वा | दा – यच्छ्<br>दा | १ प.प.<br>३ उ.प. | त्वान्त - अव्ययम्। |
| १९. | गृहीत्वा | ग्रह् | ९ उ.प. | त्वान्त - अव्ययम्। |
| २०. | दृष्ट्वा | दृश् – पश्य् | १ प.प. | त्वान्त - अव्ययम्। |
| २१. | मत्वा | मन् | ४ आ.प. | त्वान्त - अव्ययम्। |
| २२. | स्थित्वा | स्था – तिष्ठ् | १ प.प. | त्वान्त - अव्ययम्। |
| २३. | ज्ञात्वा | ज्ञा | ९ उ.प. | त्वान्त - अव्ययम्। |
| २४. | कृत्वा | कृ | ८ उ.प. | त्वान्त - अव्ययम्। |
| २५. | आकर्ण्य | आ + कर्ण् | १० उ.प. | ल्यबन्त - अव्ययम्। |
| २६. | वीक्ष्य | वि + ईक्ष् | १० आ.प. | ल्यबन्त - अव्ययम्। |

## हेत्वर्थक – धातुसाधित – तुमन्त – अव्ययानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | हेत्वर्थक – धातुसाधितम् |
|---|---|---|---|---|
| २७. | परीक्षितुम् | परि + ईक्ष् | १ आ.प. | तुमन्त - अव्ययम्। |
| २८. | निर्मातुम् | निर् + मा | २ प.प. | तुमन्त - अव्ययम्। |

## च्वि – रूपाणि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *२९. | स्वीकृतवान् | स्व + कृ | ८ उ.प. | च्वि रूपम् कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

## कर्मणि – विध्यर्थक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कर्मणि-विध्यर्थकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *३०. | परीक्षणीयः | परि + ईक्ष् | १ आ.प. | कर्मणि-विध्यर्थक-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| *३१. | नेयम् | नी | १ उ.प. | कर्मणि-विध्यर्थक-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा,<br>द्वितीया | एकवचनम् |

## कर्मणि – भूतकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कर्मणि-भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| ३२. | पृष्टम् | प्रच्छ् – पृच्छ् | ६ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा,<br>द्वितीया | एकवचनम् |
| ३३. | आनीतम् | आ + नी →<br>नय् | १ उ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा,<br>द्वितीया | एकवचनम् |
| ३४. | दत्तम् | दा – यच्छ् | १ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | दा | ३ उ.प. | | नपुंसकलिङ्गम् | प्रथमा,<br>द्वितीया | एकवचनम् |
| ३५. | कृता | कृ | ८ उ.प. | कर्मणि-भू-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |

## कर्तरि – भूतकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कर्तरि – भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *३६. | प्रसृता | प्र + सृ → सर् | १ प.प. | कर्तरि-भू-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| *३७. | प्रेषितवान् | प्र + इष् | ४ प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| *३८. | उक्तवान् | वच्<br>ब्रू | २ प.प.<br>२ उ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| *३९. | आनीतवान् | आ + नी – नय् | १ उ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४०. | आगतवन्तौ | आ + गम् – गच्छ् | १ प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा,<br>द्वितीया,<br>सम्बोधनम् | द्विवचनम् |
| ४१. | नीतवान् | नी – नय् | १ उ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४२. | कृतवान् | कृ | ८ उ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

## वर्तमानकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | वर्तमानकालवाचक | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *४३. | गच्छन् | गम् – गच्छ् | १ प.प. | कर्तरि-व-का-धा-वि | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४४. | अभाषमाणः | अ + भाष् | १ आ.प. | कर्तरि-व-का-धा-वि | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| | ('अ' हा नकारार्थी वापरलेला आहे.) | | | | | | |

## नामानि।

| क्र. | रूपम् | प्रातिपदिकम् | प्रकारः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| *४५. | राज्ञा | राजन् | अन्नन्तम् | पुंलिङ्गम् | तृतीया | एकवचनम् |
| *४६. | सेवाव्रतिनः | सेवाव्रतिन् | इन्नन्तम् | पुंलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् आणि | बहुवचनम् |
| | | | | | पञ्चमी, षष्ठी | एकवचनम् |
| ४७. | नाम | नामन् | अन्नन्तम् | नपुंसकलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | एकवचनम् |
| ४८. | वस्तु | वस्तु | उकारान्तम् | नपुंसकलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | एकवचनम् |
| ४९. | पथि | पथिन् | इन्नन्तम् | पुंलिङ्गम् | सप्तमी | एकवचनम् |
| ५०. | रोगिणः | रोगिन् | इन्नन्तम् | पुंलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् आणि | बहुवचनम् |
| | | | | | पञ्चमी, षष्ठी | एकवचनम् |

## समासपरिचयः।

### द्वन्द्वः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| १. | देशविदेशेषु | देशाः च विदेशाः च।<br>(देश आणि विदेश) | तेषु। | इतरेतर-द्वन्द्वः। |

### अव्ययीभावः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| २. | यथार्थम् | अर्थम् अनुसृत्य।<br>(अर्थानुसार) | – | अव्ययीभावः। |

### विभक्ति – तत्पुरुषः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *३. | सेवाभावः | सेवायाः भावः।<br>(सेवेचा भाव) | – | षष्ठी-तत्पुरुषः। |
| ४. | रुग्णालयम् | रुग्णेभ्यः आलयम्।<br>(रुग्णांचे आलय)<br>**टीपः** 'आलय' हा नपुंसकलिंगी शब्द आहे. पण जेव्हा तो सामासिक शब्दात शेवटचे पद म्हणून येतो तेव्हा तो पुल्लिंगी होतो. | तम्। | चतुर्थी-तत्पुरुषः। |

| | | | | |
|---|---|---|---|---|
| ५. | कार्यबाहुल्यात् | कार्यस्य बाहुल्यम्।<br>(कार्याच्या बाहुल्यामुळे) | तस्मात्। | षष्ठी-तत्पुरुष:। |
| ६. | स्वगृहम् | स्वस्य गृहम् ।<br>(स्वत:चे घर) | – | षष्ठी-तत्पुरुष:। |
| ७. | समयाभावात् | समयस्य अभाव:।<br>(वेळेचा अभाव) | तस्मात्। | षष्ठी-तत्पुरुष:। |

**नञ् – तत्पुरुष:।**

| क्र. | समस्तपदम् | विग्रह: | विभक्ति: | समासनाम |
|---|---|---|---|---|
| *८. | अभाषमाण: | न भाषमाण:।<br>(न बोलणारा) | – | नञ्-तत्पुरुष:। |

**उपपद – तत्पुरुष:।**

| क्र. | समस्तपदम् | विग्रह: | विभक्ति: | समासनाम |
|---|---|---|---|---|
| *९. | शास्त्रज्ञ: | शास्त्रं जानाति इति।<br>(शास्त्र जाणणारा) | – | उपपद-तत्पुरुष:। |
| १०. | चिकित्सक: | चिकित्सां करोति इति।<br>(चिकित्सा करणारा) | – | उपपद-तत्पुरुष:। |
| ११ | सहायकपदम् | i. सहायं करोति इति। सहायक:।<br>(साहाय्य करतो तो)<br>ii. सहायकस्य पदम्।<br>(साहायकाचे पद) | – | उपपद-तत्पुरुष:।<br>षष्ठी-तत्पुरुष:। |

**कर्मधारय:।**

| क्र. | समस्तपदम् | विग्रह: | विभक्ति: | समासनाम |
|---|---|---|---|---|
| *१२. | मन्दस्वरेण | मन्द: स्वर:।<br>(हळू आवाज) | तेन। | विशेषण-पूर्वपद-कर्मधारय:। |
| *१३. | परमगहन: | परम: गहन: ।<br>(खूप कठीण) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| *१४. | सुविख्यात: | i. विशेषेण ख्यात:।<br>(विशेष प्रसिद्ध)<br>ii. सुष्ठु विख्यात:।<br>(अतिशय प्रसिद्ध) | – | प्रादि-कर्मधारय:।<br>प्रादि-कर्मधारय:। |
| १५. | महाराज: | महान् राजा।<br>(महान राजा) | – | विशेषण-पूर्वपद-कर्मधारय:। |

**बहुव्रीहि:।**

| क्र. | समस्तपदम् | विग्रह: | विभक्ति: | समासनाम |
|---|---|---|---|---|
| १६. | शान्तचेतसम् | शान्तं चेत: यस्य स:।<br>(ज्याचे मन शांत आहे असा तो) | तम्। | बहुव्रीहि:। |